
SAPTHAGIRI
SAPTHAGIRI (SANSKRIT)
SPIRITUAL ILLUSTRATED MONTHLY
Volume:12 Issue: 09
December 2025, Price Rs.20/-
No. of pages-24
तिरुमलतिरुपतिदेवस्थानानि
सप्तगिरिः
आध्यात्मिकसचित्रमासपत्रिका
December 2025
Rs.20/-
तिरुमल वैकुण्ठैकादश्यां
श्रीपतेः स्वर्णरथोत्सवः
30.12.2025



04.12.2025
तिथौ
तिरुमल
श्रीवेङ्कटेश्वरालये
कृत्तिकादीपोत्सवः





# गीतामृतम्

श्रीभगवानुवाच -

नास्ति बुद्धिरयुक्तस्य नचायुक्तस्य भावना।
न चाभावयतश्शान्तिरशान्तस्य कुतस्सुखम्।।

इन्द्रियाणां हि चरतां यन्मनोऽनु विधीयते।
तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि।।

(भगवद्गीता २.६६,६७)

६६. भावः - मयि सन्न्यस्य मनोरहितस्य स्वयत्नेन इन्द्रियनियमने प्रवृत्तस्य कदाचिदपि विविक्तात्मविषयाबुद्धिः न सेत्स्यति। अत एव तद्भावना च न सम्भवति। विविक्तात्मानं भावयतः विषयस्पृहाशान्ति र्नभवति। अशान्तस्य विषय स्पृहायुक्तस्य कुतो नित्यनिरतिशयसुखप्राप्तिः।

विशेषांशः - मनोनिग्रहरहितस्य निर्मलबुद्धिः न भवेत्। निर्मलबुद्धि रहितस्य ब्रह्मभावना न स्यात् ब्रह्म भावनारहितस्य आत्मशान्तिर्नभवेत्। शान्ति रहितस्य सौख्यं न स्यात् एतच्चतुष्टये एकस्मात् अन्यदधिकं स्यात्। परन्तु प्रथमस्यानुष्ठानात् शिष्टत्रयं क्रमशः प्राप्यते।

६७. भावः - अयुक्तस्य कस्मात् बुद्धिर्नास्ति इत्युच्यते चेत् इन्द्रियाणां हि यस्मात् चरतां स्वस्वविषयेषु प्रवर्तमानानां यन्मनोऽनु विधीयते अनुप्रवर्तते तदिन्द्रियविषयविकल्पनेन प्रवृत्तं मनः अस्य यतेर्हरति। प्रज्ञां आत्मानात्मविवेकजां नाशयति। कथं? वायुर्नावमिवाम्भसि उदके जिगमिषतां सांयात्रिकाणां मार्गादुद्धृत्य उन्मार्गे यथा वायुर्नावं प्रवर्तयति एवमात्मविषयां प्रज्ञां हृत्वा मनः विषयलग्नान् करोति।

विशेषांशः - इन्द्रियाणां विषयप्रवर्तनेऽपि दोषोनास्ति। मनः एव प्रधानमिति वक्तृभ्यः अधिकृत्य श्रीकृष्णोपदेशं पश्यन्तु। समुद्रप्रयाणनाविकाः ''तुफान्'' महावायुचिह्नं ज्ञात्वा नावं स्थिरीकृत्य पश्चात् तीरं यथा नयन्ति तथैव यत्र स्थितत्वात् विषयदोषेण मनसः मालिन्यभावः अथवा पतनं भवेदिति शङ्कायां तत् स्थलं परित्यज्य गन्तव्यम्। अथवा एकान्तध्याने भवितव्यम्।तथा न कृतश्चेत् संसारसागरपतनमवश्यं स्यात्।

## सङ्कीर्तनम्

ब्रुवन्ति बौद्धाः बुद्ध इति
स्तुवन्ति भक्ताः सुलभ इति (ब्रुवन्ति)

गदन्ति किल सांख्यास्त्वां पुरुषं
पदवाक्यज्ञाः पदमिति च
विदन्ति त्वा वेदान्तिनं
सद्ब्रह्मलसप्तदमिति च (ब्रुवन्ति)
जपन्ति मीमांसकास्त्वां च
विपुलकर्मणो विभव इति
लपन्ति नयानुकूलास्सततं
कृपालुकर्ता केवलमिति च
भवन्ति वेङ्कटपते मुनयो
अणिमादिप्रदमतुलमिति
गुरावन्तं निर्गुणं पुनरिति
गृणन्ति सर्वे केवलमिति च। (ब्रुवन्ति)

(अन्नमाचार्य आध्यात्मक सङ्कीर्तनम् - ३५)



अनित्यानि शरीराणि विभवो नैव शश्वतः।

# वैकुण्ठद्वारदर्शनम् मुक्तिप्रदायकम्

**शेषाचले यन्माहात्म्यमन्यक्षेत्रे नतत्क्वचित्।**
**तद्वतश्रीनिवासस्य महिमा नान्यगः शुभः।।**

शेषाचलः प्रपञ्चप्रसिद्धपुण्यक्षेत्रम्। एतद्दिव्यक्षेत्रस्य यावान्महिमा अन्यक्षेत्राणां यस्य कस्यापि न विद्यते।अस्मिन्दिव्यक्षेत्रे विद्यमान श्रीवेङ्कटेशमहशमहामहिमान्वितः देवः अन्यत्र कुत्रापि नास्ति। तादृशदेवे स्थितस्यस्वर्ण भवनानन्दनिलयस्य वीक्षणम्, तत्र श्रीनिवासस्य दिव्यमङ्गलविग्रहस्य नयनानन्दकरतया दर्शनं पूर्वजन्मसुकृतमेव। कलियुगभूलोकवैकुण्ठतिरुमलक्षेत्रे यावद्वर्षं नित्योत्सवाः वारोत्सवाः पक्षोत्सवाः, मासोत्सवाः संवत्सरोत्सवाः प्रवर्तन्ते।

''मासानां मार्गशीर्षोऽहम्'' मासानां मार्गशिरमासः शिरोरत्नम्। अयं मासः श्रीमहाविष्णोः अत्यन्त प्रीतिकरः। अस्मिन्मासे क्रियमाणाः पूजाः, उपवासाः, समस्तशुभप्रदाः। अस्मिन्नेव मासे श्रीमद्भगवद्गीतावतरणं, वैकुण्ठैकादशी, हनुमद्व्रतागमनम् द्वादशाल्वाराणां एकस्य तिरुमङ्गै आल्वारोः शात्तुमोर, एवं तिरुप्पाणाल्वरु तोण्डरडिप्पोडि आल्वारूणां वर्षतिरुनक्षत्रागमनमू मुदावहम्। सूर्यस्य धनूराशिप्रवेशेन धनुर्मासः प्रारभ्यते। धनुर्मासः श्रीमहाविष्णोः आराधनाय विशिष्टमासः। पेरियाल्वारुमहाशयस्य मानसपुत्रिकारत्नं गोदादेवी (आण्डाल्) भूदेव्यतारः, तया आचरितव्रतमेव धनुर्मासव्रतम्। इदं व्रतं श्रीवत्सव्रतमित्यपि वदन्ति। आण्डाल्माता स्वसखीभिस्सह कृष्णकीर्तनम्, ध्यानम्, तस्मिन् लीनलक्ष्येन गीतानां ३० पाशुराणां गीतिकाव्रतमिदम्। अस्मिन् मासे गोदादेवी कीर्तिततिरुप्पावै तिरुमलालये स्वामिनां (जागृतं कर्तुं) निद्रोत्थपानाय क्रियमानपवित्रकार्य मिव परिगण्यते।

श्रीवेङ्कटेश्वरसन्निधौ वैकुण्ठैकादशी -

मार्गशिरमासागतशुद्धैकादशी परमपवित्रदिनम्। इदमेव वैकुण्ठैकादशीति कथ्यते। वैकुण्ठैकादश्यां सुप्रभातसमये श्रीपतेः गर्भालयसमीपस्थमुक्कोटिप्रदक्षिणमार्गः उद्घाट्यते। अस्मिन् मुक्कोटिप्रदक्षिण मार्गे प्रवेशभाग्यं भक्तेभ्यः वर्षे दशदिनानि तिरुमलतिरुपतिदेवस्थानं कल्पयति। वैकुण्ठप्रदक्षिणे प्रविष्टभक्तानां पूर्वसञ्चित पापकर्माणि नश्यन्ति। इष्टार्थ सिद्धिर्भवति। अस्मिन्नेव दिने श्रीदेवीभूदेवीसमेतश्रीमलयप्पस्वामी स्वर्णरथे तिरुमाडवीथीषु भक्तेभ्यः दर्शनप्रदानदृश्यवर्णनं अक्षरातीतम्। केवलं दर्शनं प्राप्य अनुभाव्यम्। मानवव्यक्तित्व विकासाप्रतीका भगवद्गीता। साक्षात् श्रीकृष्णामृतवाग्रूपा गीता शुद्धैकादश्यामेव आविष्कृतम्। अस्यामेकादश्यां गीतापारायणं कर्तव्यम् करणीयश्च।

अस्मिन्मासे आस्तीकेभ्यः सन्मर्ग प्रदर्श्य प्राप्तमोक्षभागवतोत्तमाः तिरुमङ्गै, तिरुप्पाण्, तोण्डरडिप्पोडि आल्वारुणां शात्तुमोरै, वर्षतिरुनक्षत्रागमनं तेषां स्मरणं अस्माकं कर्तव्यम्। एवं मार्गशिर मासे आगतानि पर्वाणि पर्वदिन वैशिष्ट्यं प्राशत्स्यं ज्ञात्वा साध्यानि साधयित्वा आचरेम। दुःखमयसंसारात् उद्धरणं प्राप्स्यामः।

''सर्वेजनास्सुखिनो भवन्तु''

# डिसेम्बर् - २०२५

सम्पुटिः-१२ सञ्चिका-०९

स्वस्तिश्री चान्द्रमानश्रीविश्वासुनामसंवत्सर मार्गशिरशुद्धैकादशीसोमवारादारभ्य - पुष्यशुद्धद्वादशी - बुधवारपर्यन्तम् - २०२५

आण्डाल्तिरुप्पावै महत्त्वम् 06
- डा पि.माधवी

पेयाल्वारु नामकमहायोगिनः वर्षतिरुनक्षत्रम् 09
- डा के.कोटेश्वरय्य

कार्तिकदीपोत्सवः 10
- कुमारी लिङ्गारेड्डि उमामहेश्वरी

गीताजयन्ती 15
- आचार्य जि.पद्मनाभम्

वैकुण्ठैकादशी वैशिष्ट्यम् 17
- डा वि.माधवरेड्डि

अतिममकारः अपकारायैव 19
- डा यन्.गुणवती

तिरुमङ्गै आल्वारु-भगवदुपदेश प्राप्तिः (चित्रकथा) 20
- डा.के.सूर्यनारायणरेड्डि

द्वादशराशीनां फलानि 22
- आचार्य वेदान्तं श्रीविष्णुभट्टाचार्यः

मुखचित्रम् - तिरुमलक्षेत्रे वैकुण्ठैकादशी, स्वर्णरथोत्सवः।
अन्तिमपुटचित्रम्:- गोदादेवी, गोविन्दराजस्वाम्यालयः, तिरुपति।

## सङ्केतः

प्रधानसम्पादकः,
सप्तगिरिः, ति.ति.देवस्थानानि
तिरुपतिः - ५१७ ५०७.

दूरभाषा - ०८७७ - २२६४५४३, २२६४३५९
प्रधानसम्पादकः,
०८७७ - २२६४३६३

सूचनानाम्, आक्षेपाणां च कृते
सम्पर्कं कुर्वन्तु -

chiefeditortpt@gmail.com

एका पत्रिका : रू.२०/-
वार्षिकग्राहकत्वम् रू.२४०/-
आजीविक ग्राहकत्वम् रू.२४००/-

*वेङ्कटाद्रिसमं स्थानं*
*ब्रह्माण्डे नास्ति किञ्चन ।*
*वेङ्कटेशसमो देवो*
*न भूतो न भविष्यति ॥*

तिरुमलतिरुपतिदेवस्थानम्

# सप्तगिरिः

आध्यात्मिकसचित्रमासपत्रिका



गौरवसम्पादकः-
श्री अनिल् कुमार सिङ्घाल् I.A.S.,
कार्यनिर्वहणाधिकारी, ति.ति.देवस्थानानि।

प्रकाशकः -

सम्पादकः, प्रधानसम्पादकः( F.A.C.)
डा॥ वि.जि.चोक्कलिङ्गम्, M.A., Ph.D.,

मुद्रापकः -

श्री आर्.वी.विजयकुमार् B.A.,B.Ed.,
उपकार्यनिर्वहणाधिकारी
मुद्रणालय - पुस्तकविक्रयकेन्द्रम्
ति.ति.देवस्थानम्, तिरुपति


मुख्यछायाचित्रग्राहकः -
श्री पि.एन्.शेखरः,
छायाचित्रग्राहकः, ति.ति.दे.
श्री बि.वेङ्कटरमणः, सहायक-छायाचित्रग्राहकः,
ति.ति.दे.

सूचना
मुद्रितलेखानां विचाराः लेखकानामेव।
एतद्विषये अस्माकं दायित्वं नास्ति।
– *प्रधानसम्पादकः*

यत्पूर्वं विधिना ललाटलिखितंतन्मार्जयितुं कः क्षमः।

# आण्डाळ्तिरुप्पावै महत्त्वम्

भगवद्रामानुजप्रतिष्ठितश्रीवैष्णवमतस्य द्वादशाल्वारूणां नालायिरं अत्यन्तं प्राणस्थानम्। इदं नालायिरं चतुस्सहस्रपाशुरसङ्कलनम्। द्वादशाल्वारूणां रचनासमहारः एव। एतेषु आण्डाल् एकैकमहिला। इयं विष्णुचित्तनामकपेरियाल्वरुमहाशयस्य पोषितनया। आण्डाल्महिलारत्नेण रचितौ द्वौलघुग्रन्थौ तिरुमोलि तिरुप्पावै इति। तिरुप्पावै धनुर्मासे वैष्णवालयेषु नित्यपारायण ग्रन्थः। विशिष्य तिरुमलक्षेत्रे वेङ्कटेश्वर सुप्रभातस्थाने गीयमानमिदम्। आण्डाल् स्वपाशुरेषु तिरुवेंगडनाथस्मरणमेव एतस्य प्रामुख्यहेतुः। विष्णुचित्तस्य वंशमेव दीप्तिमन्तं कृत्वा दत्ताशीर्वाददिव्यदीपकलिका महाप्रशस्तिकारिका तिरुप्पावैगीता। विल्लिपुत्तरूप्रान्तराज्ञी महालक्ष्मीप्रियस्त्रीः



आण्डाल् नन्दवंशसञ्जातस्वामिनि प्राप्तदिव्यसमैक्या रङ्गनाथस्वामिना पितुः कीर्तिप्रदात्री वर सुतेयम्। उत्तरभारतस्य रामकृष्णाद्यवतारैः यथा कीर्तिरागता दक्षिणभारतदेशस्य स्वाविर्भावकारणात् औन्नत्यप्रदात्री एकैक भक्तिमती आण्डाल्। वटपत्रशायिने पित्रा मालानिर्माणसमाहारे कृते भगवदासक्त्या गोदादेवी तां पुष्पमालां स्वयं कण्ठे अलङ्कृत्य आनन्दपरवशा वरकन्येयम्। अत एव तमिलदेशीयाः आण्डाल् मातरं शूडिकोड्डुत्ताल् स्वयं आत्मानं मालया अलङ्कृत्य भगवते समर्पितमुग्धा महिलेति ''पाडिकोडुत्ताल्'' गानयोग्यलघुकृतिकर्ती कवयित्रीति प्रशंसन्ति। गोदादेव्याः श्रीरङ्गनाथे हठाञ्ञातभक्तिर्नभवति। बाल्येपितृतः १०८ दिव्यदेशकीर्तिवैभवश्रवणात् उभयकावेरीमध्यस्थित स्वामिनि अनुरक्तिस्सञ्जाता। तद्भक्तिफलीकरणाय आदौ वटपत्रशायिनि भक्तिः, ततः पूर्णावतारश्रीकृष्णे भक्तिपारवश्यता सञ्जाता। एतद्भक्तितादात्म्यादेव विरचिता लघुकृतिः तिरुप्पावै। तिरुप्पावै कन्नडतमिलभाषासमासपदम्।

**तिरुमङ्गलवाचकम् -** पावै इत्यस्य नामु इति आन्ध्रे एकोऽर्थः। इदं व्रतं कृष्णावतारकालात् प्रवर्तते इति महतामभिप्रायः। कृष्णः एव पतिर्भूयादित्याकांक्षया प्रवर्तितं त्रिंशद्दिनव्रतम्। तिरुप्पावै पाशुरेषु गोदादेवी निद्रानिमग्नसखीः उत्तिष्ठन्तु जागृताः भवन्तु इति वदन्ती स्वयं गोपिकेव अलङ्कृत्य गायत्पाशुरसङ्कलनम्। एषु पाशुरेषु वधूमार्मिकता, वा प्रणयभक्तिः, परमात्मने जीवस्य वेदनासुस्पष्टं अभिव्यज्यते। श्रीवैष्णवे नम्माल्वारु तिरुमंगै आल्वारुद्वये यद्यपि मधुरभक्तिरस्ति आण्डाल् स्त्रीत्वात् सहजा मधुरभक्तिः दृश्यते। तस्याः आवेदनभक्तिः श्रीकृष्णदेवरायमप्याचकर्ष। अत एव आन्ध्रभाषायां आमुक्तमाल्यदाग्रन्थरचनायाः प्रेरिका बभूव। तिरुप्पावै पाशुरेषु उपनिषत्सारः वर्तते इति वैष्णवपण्डितानाम भिप्रायः।अत एव पेरियुवाच्चन् पिल्लैसदृशैः एतस्य विपुलव्याख्यानं कृतम्। तिरुप्पावै २,३,पाशुरयोः

- डा.पि.माधवी
चरवाणी - ८५११८०४७८४

**व्रताचरणक्रियाकलापः वर्णितः -**

२. वैयत्तु कश्वीरुगाल् नामुं नम्वाकैक्कु

३. ओङ्गियुलगलन्दवुत्तमन् पेर्पाडि

**२. पाशुरम् संस्कृते -**

भूम्यां विभूति भावुकाः श्रृणुअस्मदीय दिव्यव्रतस्य करणीयकृतास्तरुण्यः क्षीरार्णवे निखिलरक्षण योगनिद्रामातन्वतोऽस्य परमस्य पदं प्रगाय।। नाद्मो घृतं न च पयोऽपि प्रमृज्य लिम्पामहेऽञ्जन मषीं नच बन्धयामः। भिक्षां प्रदाय बहुमानमनारतं च मत्वा सुमय्युदयहेतुरिति प्रमोदात्। ध्येयः फलञ्च करणञ्च स एव कृष्णः वृत्तं निसर्गमधुरं व्रतमस्मदीयम्।

**३. संस्कृतपाशुरम् -**

संवर्ध्यलोकविततेः परमातुरस्य
नमोत्तमस्य परिगाय यदि व्रताय
स्नायाम दृष्टमुदितो भविता च
लोकः काले च वर्षति पुरा सुसुखं निकामे।
मासे त्रिवारमुस्सस्यमभीपितरन्
मत्स्यास्सफुष्टोत्पलसुमेधमधुव्रताश्च
सुष्यामरस्तुनिखद्यसमृद्धिः
सर्वे स्वकर्मनिरतास्सुखमश्नुवीरन्

नीरंध्रभूलुवितपीनकुचग्रहेतु सन्दुग्धपूरितध्येयः केलञ्चकरणं च स एव कृष्णः वृत्तं निसर्गमधुरं व्रतमस्मदीयम्। तृतीयपाशुरे व्रताचरणवेलायां मङ्गलवाद्यप्रस्तावना सन्दृश्यते। २७ पाशुरे व्रतकारणात् कन्याकाभिः प्राप्तसम्मानं, कन्यकावस्त्रधारणवेगः, नैवेद्य स्वीकरणेच्छाभोजन प्रशंसादयः वर्तन्ते।

**२६. पाशुरम् -** माले मणिवण्णामारुग ... नीराडुवान्

**२७. पाशुरम् -** कूडारै वेल्लंशीरु गोविन्दा उन्दन्नै

**२६. संस्कृतपाशुरम् -**

व्यामोहवन् मणितनो ननुमार्गशीर्ष सम्मज्ञ
नाय समयो विदुषामयं हि।
ये वाश्रुति स्मृतिपुराण विधिज्ञशिष्टाः
तत्साधनानि निहिता श्रृणु प्रदेहि।।
सर्वावनीबहुलकम्पविधायिनादान्
सम्पन्नधेनुवरदुग्धनिभाच्छमूर्तीः
त्वत्पाञ्चाजन्यमिव शंखगणांस्ततंच

भाव्यार्थिनो भवुकदीधितिं ध्वजांश्च उल्लोलचयम्प्यनुगृहाण वटस्य पत्ररम्ये शयान वरदाश्रितपक्षपातिन् ध्येयः फलञ्च करणञ्च भवान् हि कृष्ण। वृत्तं निसर्गमधुरं व्रतमस्मदीयम् इति तमिल वैष्णवविदुषामभिप्रायः।

**तिरुप्पावै लघुकृतिरचनासौन्दर्यम् -** तिरुप्पावै आध्यात्मिकग्रन्थः असमानसाहित्यग्रन्थश्च। अत्र उपमा, कालिदासरचनोपमाभ्यः अपिमनोहराः इति त्रिदण्डि रामानुजजीयरुस्वामिनः अभिप्रायः। संस्कृतकृतिषु आपादकेशान्तवर्णनानां प्राधान्यम्। तिरुप्पावै लघुकृतावपिसौन्दर्यराशेः केशनितम्बवर्णनं मनोज्ञम्। अटव्यां निर्भयतया सम्यक् प्रवृद्धमयूरः मेघोदयात् पिंछं प्रसार्य नटतीव केशपाशः वर्तते इति मनोहरापमा। स्त्रीणां - अवयवानां नितम्बः पुरुषाकर्षकः। अण्डाल् नितम्बवर्णना पद्धतिः ऊहातीतः दृश्यते। निर्भयतया स्वस्थान वल्मीकात् देहं संकुच्य ततः स्वफणाविस्फुरद्विकिरणसौन्दर्यमिव जघनसौन्दर्यं भातीति अत्युद्धुतेयमुपमा। यशोदा बालकृष्णं इलं सिगं इति विर्णितवती। कृष्णः बालकिशोरसिंहः।



आन्ध्रभाषायां तेनालि श्रीरामकृष्णकविः अनया उपमया मुग्धः शबरसिंहः इति वर्णयामास।

तिरुप्पावैलघुकृतेः तनियन् योजित पराशरभट्टरु नीलातुङ्गस्तन गिरितटीसुप्तमुद्बोध्य कृष्ण इति सम्यक् वर्णयामास। नीलादेव्याः उन्नतस्तनावेव कृष्णसिंह विहार पर्वतशिखरम्। औन्नत्यवैशाल्यात् कृष्णसिहः मोहेन मत्ततया निद्रातीति व्याख्यानविशेषः। एतादृशं स्वामिनं जागृतीकृता माता गोदादेवी। पर्वतशिखरेषु परमात्मनः शयनमिव परमरहस्यं आत्मस्वरूपं उपनिषद्गुहासु गुप्तं रहस्यं परमात्मनः ज्ञानप्रदानम्। अर्थात् स्वारोपित स्वातन्त्र्यं परित्यज्य सहजपारतन्त्र्यं स्वीकर्ती आण्डाल् माता। लघुकाव्येषु बहुभावनाचित्राणीव गोदादेवी सुप्तावस्थास्थसखीः जागृताः करोति। एनं भावं द्वादशपाशुरम् व्यक्तीकरोति -

कनेन्तु श्लम् कनृरास्मै
उदूघुष्य ह्यतनुवत्समहिष्यमन्दं
वत्सेनुकम्प्य सुविन्य कुचैकपद्मा।
दुग्धं विसृज्य परितोयदशेष गेहं पङ्की -
कमेत्यतरामधिर्धराजः।
तस्य स्वसः पतति मूर्घ्न तुषाखर्षे
त्वद्देहलीं समवलम्ब्य तु दक्षिणस्य
लङ्कापुरस्य रुचिरस्य रुषा निहन्तुः
रामस्य कान्तरघुवंशमणेः प्रियस्य
कीर्तेः प्रगानसमयेऽपिहि जोषमास्से
प्रोत्तिष्ठवाद्यनुकेचमनल्पनिद्रा।
ध्येयःफलञ्च करणञ्च स एव कृष्णः
वृत्तं निसर्गमधुरं व्रतमस्मदीथम्।''
शिरसि हिमवर्षः, अधः क्षीरप्रवाहः
अन्तरङ्गे कृष्णप्रणयानन्दप्रवाहः।
तादृश दशायांवलायां नौकादार्ववलम्बनक्रिया
द्वारबन्धावलम्वनमिव भावनाचित्रम्।

चन्द्रसूर्ययोः एककालोदये यथा स्यात् तद्वत् कृष्णनयने पद्मम‍र्ध-

निमीलित, कृष्णनयने स्वप्रीतिपात्र भक्तलोपदोषान् न पश्यत् मुकुलितवत् वर्तेते इति भाववैचित्री।

**एवमेव अमृतमथनं -** अमृतप्राप्तये नेति, महालक्ष्मीप्राप्तये इति वर्णितम्। मेधावी स्वमनोभिप्रायं अन्येभ्यः अज्ञापयित्वा अन्येभ्यः सहकारीव नटन् स्वावश्यककार्यं यथा साधयति तादृशं विधान मस्मिन् पाशुरे वर्तते। तिरुप्पावैलघु कृतौ परिहासप्रसाङ्गः अपि वर्तते - उदा दशमपाशुरे सरसपरिहासमुद्दिश्य रामः परशुरामं जित्वा तदीयायुधं यथा स्वधीनं चकार तद्वत् त्वं कुम्भकर्णं जित्वा तस्य निद्रां स्वीकृताऽसीति परिहासः। पराजितसम्पदः जूवौयथा स्वाधीनमपि पश्यामः। करोति तद्वत् तव चर्येति साभिव्यक्ति रत्रद्योत्यते। एवं बहुषु पाशुरेषु आध्यात्मिक भक्त्या सहजकाव्यसौन्दर्यं तिरुप्पावैलघुकृतौ स्थालीपुलाकत्यायेन पश्यामः।

**अन्तरार्थप्रकाशः -** तिरुप्पावै न केवलं स्त्रीणां व्रतसम्बन्धलघुकृतिः। गोदादेवी पितृस्थान परमवैष्णव विष्णुचित्त द्वारा वैष्णवरहस्यानि ज्ञात्वा तिरुप्पावैकृतौ आविष्कर्ती विद्वन्मणिः। अत एव तिरुप्पावैग्रन्थः वैष्णवरहस्यनिधिः। बहुव्याख्यातृभिः रहस्यरत्नानि पाशुरेभ्यः स्वीकृत्य स्वापदेशनाम्ना विशदी चक्रुः।


कैङ्कर्यरसानुयुताः भागवत्तोत्तमाः भगवतः कल्याणगुणानुसन्धाने पारवश्ये भागवतान् कैङ्कर्यार्थं सन्नद्धतया भवितुं आह्वयन्ति। वैष्णवे आचार्यनिष्ठायाः अपरिमितप्राधान्यं वर्तते। मधुरकविः नम्माल्वारुमहाशयमेव सर्वस्वमिव भावयामास। भगवद्वर्णनसमये आचार्यः स्वाधीनतया प्रवर्तमानः सर्वेश्वरः इति वदन्ति। एतदर्थं स्वपाशुरेषु नन्दगोपान् कुमरन्'' शब्दार्थविशेषान् अनुसन्धानयन्ति। अत एव यशोदै इलकुशिङ्कम् ... इति कथने मातृतिरुमन्त्रं प्रकाशते इति व्याख्यानं दृश्यते। एवं पाशुरे सौन्दर्यं स्पष्टीभवति। नीलमेघाः दिव्यदेह वर्षं वर्षन्तीति सहजमेव। एवं कर्म नीलवर्णकृष्णं स्फुटीकरोति प्रथमपाशुरे नारायणन् नमक्क ..... द्वितीयपाशुरे पार्कडलुल्:

पैयत्तयन्दपरमन् इति कथने कृष्णमूर्तिः द्योत्यते।

तृतीयपाशुरम् क्षीरसागर विष्णुमूर्तिं निर्दिशति। वैष्णवे आचार्यः इत्युक्ते ज्ञान - अनुष्ठान युक्तः। इत्यर्थः एतौ द्वौ भगवद्विषर्याभिरुचियुताय शिष्याय ज्ञानानुष्ठानयुतः आचार्यः उपदेशं ददातीत्यन्तरार्थः वैष्णवे भगवदपेक्षया भगवत्भक्तायैव प्राधान्यं ददति। आचार्यः एकान्तवासाभिलाषी। भगवद्गुणानु भवयुतस्य तेजस्विनः तेजोज्ञानं व्यर्थं माभूदिति माता गोदादेवी स्वसखीः जागृताः उत्तेजिताः करोति।

# पेयाल्वारु नामकमहायोगिनः वर्षतिरुनक्षत्रम्

- डा.के.कोटेश्वरय्य, चरवाणी-९९८५१२३२६२



सरोयोगि, भूतयोगि, महायोगित्रये महायोगी पेयाल्वारुनामकः शतभिषनक्षत्रे मयूरनगरे (महासूमैलापूरु) रक्तकुवलायात् नन्दकांशे जातः। रमारमणस्य पादपद्मानुरक्त्या तद्दर्शनकांक्षया सदा प्रपञ्चे सञ्चरतः भक्तशिरोमणेः अस्य भ्रान्तयोगीति नामान्तरमाप्यागतम्। श्रीहरेः आज्ञामनुसृत्य विष्वक्सेनः वैकुण्ठादागत्य योगित्रयस्य पञ्च संस्कारान् चकार। ‘‘तापः पुंड्रः नामधारणं मन्त्रोयोगश्च पञ्चमः इति वत् श्रीहरेः शंखचक्रचिह्नानि अग्नितप्तानिकृत्वा भुजयोः निवेशनं, शरीरे ऊर्ध्वपुंड्रनाम्ना नामधारणं रामानुजनाम्ना व्यवहारः, श्रीमन्नारायणमन्त्रोपदेशप्राप्तिः, यथाविधि देवतार्चनम् इत्येते पञ्चसंस्काराः। मन्त्रमन्त्रार्थाः अपि विष्वक्सेनादेव ते मुनयः ज्ञाताः। तस्मात्कालात् मुनित्रयस्य भक्तिवाहिन्याः अवरोध एव नासीत्। ‘‘नियतपुलकिताङ्गी निर्भरानन्दबाष्पागलितनिखिलसङ्गा सङ्गतस्तोत्रभीतिः। अमृतलहरीवर्णा हर्षवृत्तोपपन्ना विगतनरकभीति विष्णुभक्तिर्विभाति। प्रह्लादवत् पदे पदे पावानचिन्तनसुधामाधुर्ये अयोनिसम्भवाः श्रीहरेः निहेर्तुकजायमान कटाक्षात् रजस्तमोगुणदूराः शुद्धसत्त्वगुणप्रधानाः भगवद्गुणानुभवानन्दवाहिन्यां निमज्ञनोन्मज्ञनं प्राप्तवन्तः तद्दिव्यमङ्गलविग्रह सन्दर्शनार्तियुक्ताः आसन्।

ज्ञानवैराग्यादिदैवीगुणप्रपूर्णा विष्णुभक्तिमेव धारकपोषकभाग्यवत् स्वीकृत्य अन्नपानादीन्यपि परित्यज्य कालं यापयन्ति स्म। विप्रविषयदूराः भगवद्दर्शनकांक्षया निद्राहारान् परियज्य ग्रामैकरात्रं सञ्चरन्तिस्म।

**हरिसन्दर्शनम्** - एकदा निशि तीव्रवर्षपाते सरोयोगी एकस्य गृहस्य गृहब्राह्यवेदिकायां गृहस्थानुमत्या आर्द्रवस्त्रैरेव विश्रान्तिं स्वीकरोति स्म। किञ्चित्समयानन्तरं भूतयोगी अज्ञाततया तत्र आगत्य तस्यामेव वेदिकायां तदनुमत्या विश्रान्तिं स्वीकरोति स्म। ततः तस्यामेव निशयां किञ्चित्कालानन्तरं महायोगी अज्ञततया एव तद्वेदिकायां तदनुमत्या एव विश्रान्तिं स्वीकरोति स्म। ततः सरोयोगिभूतयोगिमहायोगिसकाशं भगवान् विष्णुः आगत्य गाढान्धकारत्वादज्ञातः तयोर्मध्ये स्थलाभावेऽपि वेदिकायामतिष्ठत्। ततः कोऽयमिति ज्ञातुं पेयाल्वर् दीपमानीय तं ददर्श। सः साक्षात् शंखचक्रगदावनमाला श्रीवत्सचिह्नः दिव्यतेजोविराजमानः श्रीमन्नारायण एव आसीत्। एवमप्रयत्नतया दैवदर्शनात् त्रयः मुनयः परस्परमज्ञाताः अपि एकैकः शतपाशुरैः भगवन्तं तुष्टुवुः। एवं महापुण्यवन्तः सरोयागि भूतयोगिमहायोगिमहाशयाः चर्मचक्षुपा भगवद्दर्शनमिहलोके प्राप्तवन्तः। बहुजन्मकृतपुण्यवशादेव दुर्लभमेतद्भाग्यं लभ्यते।

शाकेन रोगाः वर्धन्ते पयसा वर्धते तनुः।

# कार्तीकदीपोत्सवः

- कुमारी लिङ्गारेड्डि उमामहेश्वरी
चरवाणी - ९१८२०७५७६१

**अग्नये कृत्तिकाभ्यः स्वाहा**

इति शृतिवचनानुसारं कार्तीकमासः अग्निसम्बन्धमासः भवति। अस्माकं पाञ्चभौतिकशरीरस्य देहमध्ये हेमाभं त्रिकोणं वह्निमण्डलं विद्यते।

पुरुषो यज्ञमूर्तिः पिङ्गलाभः द्विशीर्षः चतुश्शृङ्गः षण्णेत्रः सप्तहस्तः दक्षिणे अभयशक्तिखड्गयुतः वामे वरद सृक् खेट्युतः त्रिपादः पीताम्बरधरः किरीटकेयूरहारादिसर्वाभरणसंयुक्तः दक्षिणवामयोः स्वाहास्वधाभ्यां सहितः सर्वदेवैः परिवृतः स्थितः।

(विमानार्चनाकल्पः ९. पटलः)

अस्य यज्ञमूर्तेः आराधनं अस्माभिः अवश्यं कर्तव्यम्। पापप्रध्वंसनाय पुण्यसंपादनाय शरीरे विद्यमानस्य परमात्मनः सन्दर्शनं, तस्य चिन्तनं, मननं ध्यानं च योगमार्गद्वारा अवश्यं प्रतिदिनं कार्यमिति इदं स्वार्थयजनं भवतीति प्रोच्यते आगमग्रन्थेषु।

सर्वेषां भक्तजनानां क्षेमस्थैर्यधैर्यादीनां फलानि साधयितुम् उद्दिष्टम् अर्चनं परार्थयजनं स्यात्। अनयोः स्वार्थपरार्थयोः परार्थयजनमेव अविच्छिन्नं शाश्वतं भवतीति राद्धान्तः।

परार्थयजनद्वारा आलये अनुष्टितानि कर्माणि नित्यनैमित्तिकानि नैकानि स्युः। तेषु प्रधानतमः विशिष्टः कृतिकादीपोत्सवः। अयं वृश्चिकमासे कृत्तिकानक्षत्रे पौर्णमास्यां तिथौ अनुष्ठेयः। असौ तिरुमलक्षेत्रे विद्यमानस्य श्रीश्रीवेङ्कटेश्वरस्वामिनःदिव्यसन्निधौसायंकाले वैखानस आगमसम्प्रदायरीत्या सम्यगनुष्ठीयते।

अज्ञानान्धकारनिवर्तकरुपः दीपोत्सवः सायंकाले स्वामिनः निवेदनानन्तरं अयमारभ्यते। प्रथमप्राकारस्य ईशान्यभागे विराजमानस्य विशिष्टेऽस्मिन् स्थाने अधिकारजनाः कैङ्कर्यजनाः परिचारकाःसर्वे तत्र मिलित्वा ध्यानतत्परास्सन्तः १००० दीपस्तम्भेषु पात्रेषु च शुद्धं तैलं निधाय सम्प्रदायजनद्वारा दीपप्रज्वलनम् अकुर्वन्। ततः ध्वज-छत्र-चामर-मङ्गलध्वनिभिः ध्वजस्तम्भप्रदक्षिणद्वारा विमानप्रदक्षिणेन सह स्वामिनः स्थानं प्रविश्य तान् स्थापयन्ति।



अर्चकाः आचार्याः वैखानसभगवच्छास्त्रद्वारा विष्वक्सेनाराधनेन सह पुण्याहवाचनं कुर्वन्तस्सन् शुद्धिं संपाद्य पञ्चदीपान् स्वीकृत्य तेषु

**बडबामुखं कालाग्निं प्रलयानलमेव च।**
**जातवेदसं महादीपं पञ्चचावाह्य पञ्चसु।।**

**क्रियाधिकारः - ३२-३**

इत्युक्तरीत्या आवाहनं अर्चनादिकं च कृत्वा वेदमन्त्रैः दिव्यप्रबन्धैः विविधमङ्गलवाद्यैस्सह स्वामिने समर्प्य नीराजनादिकं दत्वा प्रार्थनां च करिष्यन्ति।

इतरान् दीपान् स्वीकृत्य क्रमशः ब्रह्मखण्डे शयनमण्टपे मुखमण्टपे महामण्टपे स्वर्णद्वारे गरुडस्य स्थाने श्रीवरदराजसन्निधौ पाकलक्ष्मीप्राङ्गणे कल्याणमण्टपे सेनाधिपति- श्रीभाष्यकार-नृसिंहस्वामि-ध्वजस्तम्भ-बलिपीठ-तिरुमलरायमण्टप-रङ्गनाथमण्टप-महाद्वार-आञ्जनेयमन्दिर-श्रीवराहस्वामि-पुष्करिणी-इत्यादिस्थानेषु सम्प्रदायानुसारं संस्थापयन्ति कैङ्कर्यरताः।

दीपोत्सवे अस्मिन् प्रायः श्रीनिवासस्य सन्निध्यारभ्य स्वामिपुष्करिणीपर्यन्तं ७०० दीपपात्राणि भवन्ति। तानि तानि तत्र तत्र स्थापयन्ति च।

अनेन साप्ताचलनिवासरसिकः श्रीश्रीनिवासः सहस्रकिरणैः दिव्यतेजोविराजमानस्सन् आनन्दतुन्दिलो भवतीति नैव संशीतिलेशः। ततः तैलं स्वामिनः पादपद्मयोः समर्प्य अवशिष्टं सर्वे स्वीकृत्य धन्या पुनीताः पावनाः भवन्ति।

**दीपदर्शनफलम्**

**महादीपे प्रज्वलिते देवेशं प्रणमेन्मुहुः।**
**सर्वपापानि नश्यन्ति आयुः कीर्तिश्च वर्धते।**
**तद्दीपदर्शनात् सद्यः सर्वान् कामानवाप्नुयात्।।**

**क्रियाधिकारः - ३२,४४,४५**

दीपप्रज्वलनसमये देवेशाय प्रणामः कार्यः। तेन सर्वपापानि नश्यन्ति आयुः कीर्तिश्च वर्धते।

दीपदर्शनात् अज्ञाननाशनं सर्वकामावाप्तिः ज्ञानोद्दीपनं साधयन्ति भक्ताः।


सर्वे कृत्तिकादीपोत्सवसमये स्वामिनं दृष्ट्वा जन्मधन्याः पवित्रतमाः भवन्तु इत्याशास्य विरमामि।

**तमसोमा ज्योतिर्गमय।**
**मृत्योर्मा अमृतं गमय।।**




सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज। अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः।। (१८ अध्यायः - ६६ श्लोकः)

# श्रीमदनन्ताचार्यविरचिता श्रीगोदाचतुश्श्लोकी



गोपिकाभिः कृष्णं भर्तारं प्राप्तुं एकं व्रतमाचरितम्। तद्विधानमपि विष्णुचित्तः स्वपुत्रकायै उपदिदेश। तदेव धनुर्मासव्रतम्।

हेमन्ते प्रथमे मासे
नन्दव्रजकुमारिकाः।
चेरुर्हविष्यं भुञ्जानाः
कात्यायन्यर्चनव्रतम्।।

भगवत्प्रेमपारङ्गता गोदादेवी कात्यायनीव्रतं भक्त्या आचचार। उषःकाले उत्थाय शीतलजलस्नानं कृत्वा हविष्यन्नं एव दिने एकवारमेव भुक्त्वा गोपिका चरित व्रतमेव इयमाचचार।

कर्कटे पूर्वफल्गुण्यां
तुलसीकाननोद्भवैः
पाण्ड्ये विश्वम्भरां देवीं
गोदां वन्दे श्रीरङ्गनायकीम् ।

नीलातुङ्गस्तनगिरितटीसुप्तमुदूबोध्य
कृष्णं पारार्थ्यं स्व श्रुति शत
शिरस्सिद्धमध्यापयन्ती
स्वोच्छिष्टायां स्रजि निगलितं
या बलात्कृत्य भुङ्क्ते गोदा
तस्यै मम इदमिदं भूयः एवास्तु
भूयः।

नित्याभूषा निगमशिरसां निस्समोत्तुङ्गवार्ता।
कान्तो यस्याः कचविलुलितैः कामुको माल्यरत्नैः।
सूक्त्या यस्याः श्रुतिसुभगया सुप्रभाता धरित्री
सैषा देवी सकलजननी सिञ्चतां मामपाङ्गैः।।१।।

आण्डाल् मातेति आहूयमानायाः यस्याः गोदादेव्याः अद्भुतश्रीसूक्तिः तिरुप्पावैनामकदिव्यप्रबन्धः वेदान्तोनामपि सदा अलङ्कारभूता वर्तते। वेदान्तार्थाणामपि अधिकशोभां कारयति। या गोदादेवी स्वसुन्दरकचविलुलितसुगन्ध पुष्पमालिकाभिः देवदेवः आकृष्टः गोदादेव्यां अधिकानुरागत्युक्तः आसीत्। श्रवणपेयेन येन दिव्यप्रबन्धेन इयं भूमिः प्राप्तप्रबोधा। तादृशसर्वलोकजननी चूडिक्कुडुत्तनाच्चयारु गोदादेवी स्वकटाक्षैः सदा सिञ्चतु अनुगृह्णातु

माता चेत् तुलसी पिता यदि तव श्री विष्णुचित्तो महान्
भ्राता चेत् यतिशेखरः, प्रियतमः, श्रीरङ्गधामे यदि।
ज्ञातारस्थनयाः त्वद्भुक्तिसरसस्तन्येन संवर्धिताः
गोदादेवि! कथं त्वमन्यसुलभा साधारणा श्रीरसि।।२।।

हेमातः गोदादेवि! तव जननी साक्षात् भगवत्प्रियतमा तुलसी। तव जनकः महात्मा भगवत्प्रियभक्तः विष्णुचित्तः। तव सोदरः साक्षात् यति शेखरः तव अत्यन्तप्रियतमः श्रीरङ्गधामः श्रीरङ्गनाथः। तव पुत्राः के इतिचेत् सरसदिव्यप्रबन्धस्तन्यं सेवित्वा वर्धमानाः ज्ञानिनः। मातः। त्वमनन्यसुलभा एवमेव आसाधारण श्रीगोदादेवी भूत्वा प्रकाशसे। त्वं महोन्नतदेवीति स्तुवन्ति।

कल्पादौ हरिणा स्वयं जनहितं दृष्टेन सर्वात्मना
प्रोक्तं स्वस्य च कीर्तनं प्रपदनं स्वस्मैप्रसूनार्पणम्।
सर्वेषां प्रकटं विधातुमनिशं श्री धन्विनये पुरे
जातां वैदिक विष्णुचित्ततनयां गोदामुदारां स्तुमः।।३।।

कल्पारम्भे सकललोकस्यापि आत्मा भगवान् श्रीहरिः एतल्लोक हितार्थं स्वयं स्वकीर्तनानि प्रपत्तिं, शरणागतिं सदा स्वस्य पुष्पार्पणमेतादृशोज्जीवन गतीः सर्वाः उपदिदेश। एतानि सर्वाणि नित्यमाचर्य प्रकटनार्थं धन्विनव्यपुरनामक श्रीविल्लिपुत्तूरु पट्टणे वैदिकाग्रेसरविष्णुचित्तस्य पुत्रिकात्वेन आविर्भूय अत्यन्तोदार स्व भावयुतां गोदादेवीं मनसा स्तौमि।

आक्तस्य परिष्क्रियामनुपमामासेचनं चक्षुषो
आनन्दस्य परम्परामनुगुणामारामशैलेशितुः।
तद्दोर्मध्यकिरीट कोटिघटितस्वोच्छिष्टकस्तूरिका
माल्यामोदसमेधितात्मविभवां गोदामुदारां स्तुमः।।४।।

श्रीशेषशैलेश्वरस्य वेङ्कटनाथश्रीनिवासस्य अभीष्टं यद्भवति तदभीष्टस्य, गोदादेवी श्रीनिवासस्य दिव्यनेत्रयोः अपारानन्दं ददाति। श्रीनिवासस्य वक्षःस्थलं, अद्भुतकिरीटाग्रभागश्च गोदामुक्तमालिकया विभूषिताः तन्मालिकामोदेन एषः सर्वगन्धः, एषः सर्वरसः एष ह्येवानन्दयति इति उपनिषत्सु कीर्त्यमानः भगवान्, तस्य भगवतः अद्वितीयसुगन्धं, आनन्दं सन्तोषं च सदा कारयित्र्याः गोदोदेव्याः वैभवं अभिवृद्धिपथे प्रकाशते। एतादृशदेवदेवस्य अत्यन्तप्रियतमभक्ताग्रेसरीं महनीयां आण्डल्मातरं गोदादेवीं सर्वे वयं स्तुमः।

स्वोच्छिष्टमालिकाबन्धगन्धबन्धुरजिष्णवे।
विष्णुचित्ततनूजायै गोदायै नित्यमङ्गलम्।।




30.10.2025 तिथौ तिरुमलक्षेत्रे श्रीपतेः निर्वाहितपुष्पयागचित्रम्। अस्मिन् कार्यक्रमे ति.ति.देवस्थान कार्यनिर्वहणाधिकारी श्री अनिल् कुमार सिंघाल् ऐ.ए.यस्., अन्ये आलयाधिकारिणः च भागं गृहीतवन्तः।



30.10.2025 तिथौ तिरुपति - श्रीनिवासमङ्गापुरे श्रीवेङ्कटेश्वरस्वामिने निर्वाहितपवित्रोत्सव चित्रम्।



26.10.2025 तिथौ तिरुमल पापनाशनं ड्याम् समीपे ति.ति.देवस्थान धर्मकर्तृमण्डल्यध्यक्षैः बि.आर्.नाडयु महोदयैः निर्वाह्यमान प्रत्येकपूजा दृश्यम्।



31.10.2025 तिथौ तिरुमलक्षेत्रे मातृश्रीतरिगोण्डवेङ्गमाम्बान्नप्रसाद समुदाये ति.ति.देवस्थान कार्यनिर्वहणाधिकारिभिः श्रीअनिल् कुमार सिंघाल् ऐ.ए.यस., महोदयैः निर्वाह्यमानायुधपूजा। अत्र अन्ये च अधिकारिणः भागं गृहीतवन्तः।



18.10.2025 तिथौ ति.ति.देवस्थान परिपालनभवनवीथ्याः पश्चिमविभागस्थ मुद्रणालये ति.ति.देवस्थान संयुक्तकार्यनिर्वहणाधिकारिणा श्री वि.वीरब्रह्मं ऐ.ए.यस्., महोदयेन, अन्यैश्चाधिकारिभिः आयुधपूजा निर्वहण दृश्यम्।

गीताकल्पतरुं भजे भगवतता कृष्णेन संरोपितं वेदव्यास विवर्धितं श्रुतिशिरोबीजं प्रबोधाङ्कुरं। नानाशास्त्ररहस्य शाखमरतिक्षात्तिप्रवालाङ्कितं कृष्णांघ्रिद्वयभक्तिपुष्पसुरभिं मोक्षप्रदं ज्ञानिनाम्।।

प्रायशः प्रसिद्धव्यक्तिभ्यः निर्वाह्यमानगीताजयन्ती, गीताग्रन्थस्य निर्वहणं विशेषांशः एव। भगवान् श्रीकृष्णः स्वयमेव रणरङ्गे अर्जुनाय कृत गीतोपदेशदिनं मार्गशिरशुद्धेकादशी। अत एव एत्तद्दिनं महापर्वदिनमिव सम्भाव्यते। श्रीराम श्रीकृष्ण श्रीबुद्ध श्रीदत्तात्रेय श्रीशङ्करजयन्तीत्याद्युत्सवपर्वदिनेषु तत्तदवातार पुरुषान् जनाः यथा अर्चयन्ति तद्वत् गीताजयन्तीसन्दर्भेऽपि गीतार्चन निर्वहहणाचारः अनादिकालादेव प्रवर्तते। गीतां शास्त्रोक्तरीत्या पूजयन्ति। गीताग्रन्थेन सह श्रीकृष्णव्यासार्जुनचित्रपटान् पुष्पमालाभिरलङ्कवन्ति। गीतायाः अष्टादशाध्यायपारायणं व्यक्तिगतं वा सामूहिकं वा कुर्वन्ति। बहुभक्तसमावेशे सामूहिकपारायणं श्रेष्ठतरम्। समष्टिपारायणात्

- आचार्य जि.पद्मनाभम्
चरवाणी -९२४७३२८२८६

जातगीताघोषः जनानुत्तेजितान् कृत्वा दूरस्थ जनश्रुतिपुटान् पुनीतान् करिष्यति।

**गीतायां कर्मयोगः -** गीता सन्न्यासिनां गृहस्थानां सर्वेषा मुपयोगकारिणी। अस्यां अन्ययोगैस्सकं कर्मयोगः सम्यक् प्रबोधितः। अत्र लौकिक व्यवहारिककार्यनिरतानामपि मोक्षप्रात्युपायः सम्यक् प्रतिपादितः। Religion must rule even worldly pursuits प्रपञ्चकार्याणि दैव भावनया कर्तव्यानीति। शरीरेन्द्रियाणि लौकिककार्येषु प्रवृत्तान्यपि मनसः दैवे निश्चलत्वभावः आवश्यकः कर्मयोगबोधः। 'योगस्थः कुरुकर्माणि' कर्मफलं ईश्वरार्पणं कृत्वा कर्तुत्वं परित्यज्य सर्वाणि कार्याणि कुर्वन्तु। एवं कर्माचरणात् बन्धः न भवेत्। दैवमनन्तम् ज्ञानमनन्तम्। अतः दैवदृष्ट्या दैवार्पणबुद्ध्या कार्याचरणात् लौकिकं वा पारमार्थिकं दैवमेव शिष्यते।




न बन्धुमध्ये धनहीनजीवनम्।

नतत्र कर्मबन्धः इति गीताचार्योक्तकर्मयोगरहस्यम्। फलापेक्षया क्रियमाणकर्मभिः जीवः बद्धो भवति। कर्तव्यकर्माचरणविधानमेव गीताबोधः। चतुराश्रमवासिभिरपि विध्युक्तधर्मकर्माणि ईश्वरार्पणबुद्ध्या कर्तव्यानि। व्यवहारे परमार्थप्रयोगः इति कथनादेव गीतायाः विश्वव्यापकत्वं जातम्। ज्ञानानन्तरं निवृत्तिः अनिवार्या न भवति। अर्जुनस्य जीवितमेवात्र उदाहरणम्। गीता वैराग्यं न बोधयति। ज्ञानेन विना मोक्षः न सिद्ध्यति। चित्तशुद्ध्या विना न ज्ञानप्राप्तिः। निष्कामकर्मणैव चित्तशुद्धिः। अतः साधकस्य प्रप्रथमतया कर्मयोगः अत्यावश्यकः। ''आत्मार्पणे योगः कर्मकारणमुच्यते इति गीतावचनमेव कर्मणः आवश्यकत्वं बोधयति। कर्म न परित्याज्यम्। कर्मणः पवत्रीकरणपद्धतिः अभ्यास्या। फलापेक्षाराहित्यमेव कर्मणः पवित्रत्वम्। निष्कामकर्म मोक्षगामि। अतः कर्मशुद्धिः, तद्वारा हृदयक्षेत्रपुनीतत्वं तद्वारा ज्ञानाविर्भावात् परमानन्दप्रदमोक्ष प्राप्तिरिति कर्मयोग सारः।

**गीतायां भक्तियोगः -** भगवत्प्राप्तेः अवलम्ब्यमान साधनानां भिन्नभिन्नत्वात् योगाः अपि भिन्नभिन्नाः निर्दिष्टाः। गीतायां जैमिनेः कर्मसिद्धान्तः नारदस्य भक्तिसिद्धान्तः पतञ्जलेः योगसिद्धान्तः वेदव्यासस्य ज्ञान सिद्धान्तः इत्येत्रे सिद्धान्ताः सम्यक् प्रतिपादिताः। योगमार्गाणां भिन्नत्वेऽपि तेषां सर्वेषां समन्वयप्रदर्शनं गीतायाः महिमाविशेषः एव। मोक्षप्राप्तेः कर्मभक्तिध्यान ज्ञानानां अवाश्यकता अनिवार्यमेव। कर्मणा पवित्रता, भक्तिध्यानाभ्यां प्रकाशः ज्ञानेन ऐक्यता सिद्धयन्ति। साधनानां परिपूर्णतयैव परमशान्तिर्लभ्यते। मानवानां मनस्तत्त्वमाधारीकृत्य साधनेषु मुख्यत्वं वा गौणत्वं स्यात्। सर्वमार्गाणां प्रधानं लक्ष्यं अहङ्कारत्यागः एव।


भगवति प्रीतिमत्वमेव भक्तिः। भक्तौ तन्मयत्वविशिष्टः त्वमेव शरणं नाहमन्यं जानामि मदीयं किञ्चिदपि नास्ति, माता पिता सर्वं त्वमेव अहं दासानुदासः इति भगवन्तमुद्दिश्य वदति। अर्जुनोऽपि श्रीकृष्णपरमात्मने सर्वं समर्प्य शाधिमां त्वां प्रपन्नमिति इति प्रार्थयामास। भगवति अनन्यभक्तिरावश्यकी अन्यत्रचित्तलग्नाभावः एव अनन्याभक्तिः। अव्यभिचारिभक्तियुतः एव मम अत्यन्तप्रियः। एतादृशमेवाहं मृत्युरूपसंसारादुद्धरिष्यामीति सकरुपमुवाच (अनन्याः चिन्तयन्तो मां (९-२२) अनन्येनैव योगेन (१२-६) अनन्यचेतास्सततम् (८-१४) मनसः दैवे स्थिरत्वाभावे अभ्यासेन मनसः दैवस्थिरत्वं सम्पादनीयमिति भगवदुक्तिः प्रपञ्चे स्थिरः नाशरहितः परमात्मैव। मायातीतं परमेश्वरं मायान्तर्गत जीवः अवश्यमाश्रयणीयः। तारणाय अन्यमार्गः नास्ति। एवं भगवदाश्रयः एव भक्तिरिति वदन्ति। सर्वेश्वरसद्गुरोः अनुग्रहादन्यः मार्गः जीवाय संसारसागरसुमुद्धरणाय नास्ति। इदमेव परमरहस्यम्। प्रकृतिः परमात्मधीना। परमात्मनः अनाश्रयात् प्रकृतिविजयः न स्यात्। परमात्मा भक्त्यधीनः। भक्त्या चित्तं भगवति स्थिरीकृत्य आराध्यमानाः भगवदनुग्रहं प्राप्य सर्वापद्विमुक्ताः भगवति लीनाः भवेयुः। तादृश भक्तानां योगक्षेमं भगवानेव वहिष्यति। ''मच्चित्तः सर्वदुर्गाणि मत्प्रसादादवाप्स्यसि। तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्'' इत्यादिगीतावक्यैः परमात्मा सम्यक् भक्तरक्षकत्वं विशदी चकार।

मोक्षार्थं प्रत्यक्षहेतुभूतसाधनात्मकविचरणरूपज्ञाप्राप्तेः आदौ भक्तिपरिपूर्णहृदयाविर्भावः आवश्यकः। ''भक्त्या ज्ञानं प्रजायते'' इति शास्त्रवचनम् भक्तिपुष्प विकासे ज्ञानफलाविर्भावः, जीवस्य भक्त्या सन्तुष्टः भगवान् ज्ञानफलबुद्धियोगं ददातीति विभूति योगे स्पष्टी कृतम्। ''तेषां सततयुक्तानां भजतां प्रीतिपूर्वकं। ददामि बुद्धियोगं तं येनमामुपेयान्तिते।

मानवेन स्वहृदयक्षेत्रे हृदयोद्याने पोषितसुगुपुष्पाणि, दैवीसम्पत्पुष्पराशिः। यदा भगवदर्पणं करोति तदा परात्परः अपरिमितानन्दं प्राप्नुयात्। इयमेव परापूजा पराभक्तिरित्युच्यते। अत एव भक्तियोगे श्रीकृष्णः द्वेषराहित्यं मैत्रीकरुणेत्यादि द्वात्रिंशत्सुगुणराशिं वर्णयामास। एतादृशसद्गुणवानेव आत्मीयभक्तः। एतद्गुणग्रहणमेव भक्तिः। ''भक्तिमान्यः समेप्रियः मैत्र्यादिसुगुणराशिंसम्पाद्य भगवत्कपापात्राः भवन्तु। तदैव भक्तिभावपरिपूर्णता स्यात्। सर्वेभ्यः योगेभ्यः भक्तियोगः अतीव सुलभतया आचरणयोगः। आखण्डज्ञानोपदेश चतुर्दशाध्यायेऽपि माञ्च योव्यभिचारेण भक्तियोगेन सेवते। स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते इत्युक्तम्। विश्वरूप सन्दर्शनयागे भक्त्यात्वनन्यया शक्यः अहमेव विधोर्जुना ज्ञातुं द्रष्टुंच ततस्तेन प्रवेष्टुंच परन्तप। एवं विश्वरूपं ज्ञातुं द्रष्टुं प्रवेष्टुमनन्यभक्तया एवं साध्यम्। भगवदैक्याय भक्तिरेव प्रधानसाधनम्। ''भक्त्या मामभिजानाति इत्यादिवक्यैः भक्तेः अलौकिक प्रतिभा सम्यक् विज्ञायते। अतः सर्वोभक्तयोगं समाश्रित्य ब्रह्मानन्दमनुभवन्तु।



यस्य नास्ति स्वयं प्रज्ञा शास्त्रं तस्य करोति किम्।



# वैकुण्ठैकादशी वैशिष्ट्यम्

- डा वि.माधवरेड्डि
चरवाणी - ९९४८५२३२५९

**भवाब्धितारं कटिवर्तिहस्तं स्वर्णाम्बरं रत्नकिरीटकुण्डलम्।
आलम्बिसूत्रोत्तममाल्यभूषितं नमाम्यहं वेङ्कटशैलनायकम्॥**

अस्मिन्नवर्षे डिसेम्बर् ३० वैकुण्ठैकादशी पवित्रदिनम्। भारतीयपर्वदिनानिविशिष्टार्थयुतानि एव न बाह्याडम्बर निमित्तानि। अस्माभिराचर्यमान प्रतिपर्वणि देवताराधन सम्बन्धः अवश्यं भवति। पर्वदिने पूजाध्यानोपासनान्यचर्य दैवकृपपात्राः भवामः। श्रीनिवासस्य प्रीतिकरव्रतेषु एकादशीव्रतं बहुश्रेष्टं भवति। तत्रापि वैकुण्ठैकादशी अत्यधिकतया विशिष्टं भवति। इदमेव कोटित्रियैकादशी मुक्कोटि एकादशी इति वदन्ति। अस्मिन्दिने वैष्णवदेवालयेषु उत्तरद्वारमुद्घाटयन्ति। इदमेव वैकुण्ठद्वारदर्शनमिति वदन्ति। तिरुमल श्रीनिवासलये इदं पर्व दिनं महावैभवतया निर्वाह्यते। जन्तूनां नरजन्म दुर्लभम्। चतुरधिक लक्षजीवेषुदुर्लभस्य नरजन्मनः विशिष्टतां ज्ञात्वा प्रवर्तितव्यम्। मानवत्वपूर्वत्वाय जीवितकाले पूर्णगुणान् स्वीकृत्य पूरीकरणं कर्तव्यम्। एतादृश पूर्णत्वायैव वैकुण्ठमिति नाम। कुण्ठं नाम लोपः। तदभावः एव वैकुण्ठम्। एकादशी ११ संख्यां निर्दिशति। पञ्चकर्मेन्द्रियानि पञ्च ज्ञानेन्द्रियानि मनः एकम्। एतदेकादशानां एकत्वमेव परिपूर्णा स्थितिः। अत एव वयं वैकुण्ठैकादशीं वर्षे वर्षे निर्वहामः। देहानामनकत्वेऽपि तेषु दिव्यत्वमेकमेव इति ज्ञानावगाहः एव वैकुण्ठैकादशी पर्वदिनान्तरार्थः। भगवान् सर्वेषु प्रतिबिम्बमिव प्रकशते। एतादृशपवित्र दिव्यवेदन्तप्रबोधः अस्मद्भारतीयसंस्कृतिः लोकाय प्रददति। इदमेव मानवजीवित परमावधिः। पूर्णत्वप्रदेशं वैकुण्ठं प्राप्तुं द्वेद्वारे प्रतिबन्धकेभवतः। ते एव अत्मस्तुतिः परनिन्दा। असूयानामककीलेन द्वारे बध्नावः। अहङ्करनामकतालयन्त्रमपि नियोजयामः। अस्माभिः क्रियमानसाधनानि सर्वाणि द्वारोदूघाटनायैव। तालयन्त्रं निवार्य द्वारोद्घाटनात् अन्त प्रवेशः सुकरो भवति। भक्तिरेव तत्तालनिवारणाय कीलकं भवति।

अस्मन्मानोमथनात् जायमानपवित्रदिव्यत्व स्मरणमेव वैकुण्ठैकादश्याः अन्तरार्थः। अस्मदन्तः करणनामक पाकसाधाने हृदयात्मककुण्डं निवेश्य वांछा नामकक्षीरं तत्र निवेश्य मुमुक्षत्वनामक ज्ञानसाधनेन इडापिङ्गलनामकरज्जुभिः सोऽहमिति जपन् मथनं कृतञ्चेत् शान्तिनामकामृतप्राप्तिः अवश्यंलभ्यते। वैकुण्ठैकादशी साधनफलं अमृतत्वमेव।

अस्माकमुच्छ्वासनिश्वासेषु दैव चिन्तनं भाव्यम्। चिन्तनभगवद्भजनविहारः कार्यः। बुद्धेः भगवति एकाग्रत्वमावश्यकम्। अस्माकं कर्तव्यकर्माणि भगवदर्पणानि कर्तव्यानि। चित्तशुद्ध्या सत्कर्माण्याचर्य भगवदाराधनेन जीवितं सार्थक्यं कर्तव्यम्। वैकुण्ठैकादशी सन्देशः अयमेव।

एकादश्यां निराहारः भूत्वाऽहं तुपरेऽहनि भोक्ष्येऽहं पुण्डरीकाक्ष। गतिर्भवममाच्युत!। इति भगवन्तं श्रीमन्नारायणं प्रार्थयित्वा तस्य साहाय्यमाद्यं कृत्वा व्रतमिदं अनादिकालादारभ्यऋषिसन्तत्याविर्भूतं अपूर्वमोक्षप्रदश्चेति लोकप्रसिद्धिः। भक्तेभ्यः आध्यात्मिकसाधने विग्रहाराधनं, उपवासाचरणं व्रताचरणमावश्यकम्। उपवासः नियमनिग्रहान् ददाति। जिह्वाचापल्यं निवारयति। शक्तिं उत्तेजयति। प्रार्थना सञ्चितकर्मबीजान् निर्मूलयति। सत्सङ्कल्पान्

जनयति। त्रिकरणशुद्धिमपि ददाति। निरन्तरजपनिष्ठाया साधुत्वं प्राप्यते। भगवदनुग्रहञ्च प्रापयति। पापं परिहरति। भगवत्साक्षात्कारञ्चदिव्य रसायनमिव उपकरोति, शान्तिं जीवितानन्दं ददाति।

प्रातःकालशीतलोदकस्नानानि सन्ध्यावन्दनानि जपतपव्रतादीनि पवित्रकार्याणि मनोनिर्मलतायै निष्ठायै उपकुर्वन्ति। भगवदनुभूतिं हृदयपवित्रतां कष्टसहनत्वं विश्वासं भक्तिं ज्ञानदृढत्वमुपजनयन्ति। एतानि कार्याणि भगवदाराधनाय राजमार्गाः।

मोक्षमाधने शमदमोपरतितितीक्षाश्रद्धासमाधानेषु तितिक्षा मानवेभ्यः अतीव मुख्यम्। शीतोष्णसुख दुःखयोः समत्वभावः एव तितीक्षा। प्रकृतिसहजलक्षणान्यनुसृत्य यावत्साध्यं अस्मद्बाधासहनाभ्यासः एव तितीक्षा, देहभ्रन्तिं परित्यज्य मनः ध्याने स्थिरीकरणे तितीक्षा उत्तमसाधनं भवति। समत्व भावनासिद्धयेऽपि तितीक्षा उत्तमं साधनं भवति। तितीक्षया श्रद्धा लभ्यते। ''श्रद्धावान् लभते ज्ञानम्'' इत्युक्तत्वात् श्रद्धया ज्ञानं ज्ञानात् समाधानं लभ्यते। समाधानस्य ब्रह्मभावः एकत्वं समाधिरिति नामानि। एकत्वानुभवानन्दाय क्रियमानं कार्यमेव मुमुक्षुत्वम्। एकत्वदर्शननेव ज्ञानम्। तदेव तितीक्षा सारः, गम्यश्च। इदमेव वैकुण्ठैकादशी, पूर्णत्वैकाशी।

**जिह्वेकीर्तय केशवं मुररिपुं चेतोभज श्रीधरम्**
**पाणिद्वन्द्वेन समर्चयाच्युतं कथांश्रोत्रद्वयेन त्वंश्रृणु।**
**कृष्णं लोकय लोचनद्वयेन हरेर्गच्छाङ्घ्रिं युग्मालयम्**
**जिघ्रघ्राण मुकुन्दपादतुलसीं मूर्धानमाधोक्षम्॥**

इति कुलशेखराल्वरोक्तिमनुसृत्य देहेन सर्वाणि कार्याणि कर्तव्यानि। एवं अस्मत्सर्वेन्द्रियाणि भगवदर्पितानि कर्तव्यानि। चित्तं भगवन्मयं, हृदयं भगवत्परितः, भवितव्यः। सच्चिदानन्द स्वरूप भगवद्दिव्यानुभूतिः प्राप्तव्या। इदमेव सर्वसधनगम्यम्। अमृतत्वं मोक्षश्च। वैकुण्ठैकादशीदर्शन लक्ष्यमिदमेव।

**तिरुमलक्षेत्रे वैकुण्ठैकादशीद्वादशी** - तिरुमल श्रीवेङ्कटेश्वरालये वैकुण्ठैकदशी महावैभवोपेततया निर्वाह्यते। एकादश्याः पूर्वदिने दशम्यां रात्रौ एकान्तसेवानन्तरं स्वर्णद्वाराणि प्रवेशानर्हाणि पिधानानि कुर्वन्ति। पश्चात् उषःकाले वैकुण्ठैकादश्यां सुप्रभातादारभ्य पश्चात् द्वदशी रात्रौ एकान्तसेवापर्यन्तं श्रीवारिगर्भालय समीपस्थामुक्कोटि प्रदक्षिण मार्गं उद्घाटयन्ति। एकादशी द्वादशी दिनद्वयं श्रीवेङ्कटेश्वरदर्शनानन्तरं भक्ताः मुक्कोटिप्रदक्षिणमार्गद्वारैव गच्छन्ति। इदं मुक्कोटिप्रदक्षिणप्रवेशद्वरमर्गं वैकुण्ट प्रदक्षिणद्वारमिति कथयन्ति।

वैकुण्ठैकादशी पर्वदिने मुक्कोटिप्रदक्षिणमार्गं बहुवर्ण सुवर्ण विद्युद्दीपैः पुष्पमालाभिः मनोहरतया अलङ्कुर्वन्ति। श्रीस्वामिनः अत्यन्त समीपस्थ प्रदक्षिणमार्गे दर्शनानन्तरं गताः भक्ताः विशिष्टाश्चर्यदिव्यानुभूतिं अनुभवन्ति। वैकुण्ठैकादशी पश्चात् द्वादशीदिने सूर्योदयात् पूर्वं श्रीस्वामिपुष्करिणीतीर्थकोटिः प्रवर्तते। वैकुण्ठैकदश्यां तीर्थाणि पुष्करिण्यः पुण्यस्थलस्वामि पुष्करिण्यां दिव्य सूक्ष्मरूपेण विलीनाः भवन्ति। सर्वदेवतासन्निधिं प्राप्य वर्तन्ते।अतः अस्मिन् पर्वदिने श्रीवार्यालये श्रीपतेः सुप्रभातं तोमालसेवा, अर्चना निवेदनानि यथा क्रमं प्रवर्तन्ते। पश्चादानन्दनिलयस्थ सुदर्शनचक्रत्ताल्वारु शिबिकामधिरुह्य तिरुमलतिरुवीथीषु महाप्रदक्षिणत्वेन आगतः श्रीवराह स्वाम्यालयप्राङ्गणं प्राप्नोति। तत्र चक्रत्ताल्वरोः अभिषेकानन्तरं पुष्करिण्यां पवित्रस्नानं कारयन्ति। एवं चक्रस्नान समये असंख्याक भक्ताः पुष्करिण्यां पवत्रिस्नानमाचरन्ति। पश्चात् प्रदक्षिणत्वेन प्रस्थाय प्रदक्षिणत्वेन आगतः वैकुण्ठैकादश्यां उभयदेवीभ्यां मलयप्पस्वामी सर्वालङ्कारभूषितः तिरुवीथीषु स्वर्णरथे परिभ्रमति। श्रीवारिसन्निधौ ''रापत्तुतोडक्कं'' अनन्तरं नम्माल्वारुरचित भगवद्विषयदिव्यप्रबन्धस्थचतुर्थायिरं अध्ययनप्ररम्भं कुर्वन्ति। वैकुण्ठद्वारात् सहस्राधिक भक्ताः श्रीपतेः दर्शन भाग्यं प्राप्नुवन्ति। अतः इममुत्सवं वैकुण्ठद्वारस्थ भगवदालोकनमहोत्सवः इति कीर्त्यते।

**एकादश्यां निराहारः भूत्वाहन्तु परेऽहनि।**
**भोक्ष्येहं पुण्डरीकाक्ष! गतिर्भावममाच्युत॥**

**शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं**
**विश्वाकारं भुजगशयनं पद्मनाभं सुरेशं।**
**लक्ष्मीकान्तं कमलनयनं योगिहृद्ध्यानगम्यं**
**वन्देविष्णुं भवभयहरं सर्वलोकैकनाथम्॥**

**भवाब्धितारं कटवर्तिहस्तं**
**स्वर्णाम्बरं रत्नकिरीटमण्डलम्।**
**आलम्बिसूत्रोत्तममाल्यभूषितं**
**नमाम्यहं वेङ्कटशैलनायकम्।**





धनिनं निर्धनञ्चैव निर्धनं धनिनं करोति विधिः।



# अतिममकारः अपकारायैव

- डा.यन्.गुणवती
चरवाणी - ८९१९६२०२२६

ममकारः आध्यात्मिकमार्गे महाविघ्नकरः। महात्मनः अपि ममकारकारणात् अपमार्गवर्तिताः भवन्ति। ज्ञानिनामपि चेतांसि देवी भगवती सा बलादाकृष्य मोहाय महामायां प्रयच्छति। इति देवीमाहात्म्यग्रन्थवचनम्। ममकारः महापकारं करोतीति श्रीमद्भागवतपञ्चमस्कन्धे राजर्षिभरतचरित्र द्वारा वयं सम्यक् जानीमः।

भरतः साक्षात् विष्णवंशऋषभदेवस्य अग्रजपुत्रः। अजानाभनाम्ना प्रसिद्धस्य भारतदेशस्य भरतद्वारैव भारतदेशः इति नाम। ऋषयः भगवदवताराः अपि सर्वधर्मरक्षकाः सन् आदर्शगृहस्थाश्रमे आदर्शभूताः आसन्। तस्य शतपुत्रेषु भरतः अग्रजः। ऋषभः सर्वपुत्रेभ्यः धर्ममुपदिश्य अग्रपुत्रं पट्टाभिषिक्तं कृत्वा परमहंसाश्रमे अवधूतो बभूव। भरतोऽपि भगवच्छक्त्या बहुवर्षपर्यन्तं धर्मबद्धतया राज्यपालनं कृत्वा पश्चात् राज्यपालनंपुत्रेभ्यः दत्वा विष्णुभक्तोऽयं पुलहाश्रमं जगाम। तत्र भरतः समीपस्थ मण्डकीनदीसमीपे लब्ध - पुष्पैः तुलसीदलैः विष्णुं भक्त्या पूजयन्नासीत्। कदाचित्सः नदीजलस्नानं कृत्वा नित्यकर्मानन्तरं ओंकारं जपन् नदीतीरे उपाविशत्। तस्मिन्नेव समये एकः हरिणः दाहनिवृत्त्यर्थमागत्य नदीजलं पिबतिस्म। अकस्मात् सिंहगर्जनां श्रृत्वा भयात् नद्यवधितीरं प्राप्तुं संभ्रमात् उल्लंघनं चकार। गर्भिण्याः तस्याः गर्भात् वत्सहरिणः जले अपतत्। तदा माता हरिणी मृता बभूव। मातृपरित्यक्तां प्रवाहावेगपतितं वत्सं दृष्ट्वा स्वहस्तेन स्वीकृत्य आत्मीयभावेन आश्रममानीय पोषयतिस्म। दिनदिन प्रवर्धमानममकारः महादयाविशिष्टः सः राजर्षिः - नित्याचरणभगवदाराधनकृत्यान्यपि नाचरति स्म। शरणागतरक्षणोपेक्षा दोषायैवेति तं अङ्केनिधाय प्रेम्णा स्वपुत्रमिव लालयति स्म। अतः सः नष्टयोगाभ्यासः मोक्षसाधने पराङ्मुखः बभूव। पुरा मोक्षार्थं भार्यापुत्रानपि परित्यज्य वनमागतः। अद्य नित्यं हरिणध्यासपरः कालं यापयति स्म। अन्त्यकाले हरिणनिमग्नमनाः तनुं तत्याज। हरिणचिन्तया प्राणत्यागात् अनन्तरजन्मनि हरिणजन्म अवाप। योगसाधनप्रभावात् आध्यात्मिकचित्तवृतिः पूर्वजन्म स्मृत जन्मवृतान्तः हरिणे ममकारात् हरिणः अभवमितिचिन्तयन् पश्चात्तप्तः वैराग्यभावेन पितरौ मित्रादीन् परित्यज्य ऋष्याश्रमेषु परिभ्रमन् प्रारब्धक्षयार्थं निरीक्षन् मृगशरीरं तत्याज। मोक्षः मानवदेहजननादेव न भवति। अनन्तर जन्मनि ब्राह्मणकुटुम्बे जातः। भगवदनुग्रहात् सात्विक गुणान्वितः आध्यात्मिकचिन्तनया पूर्वजन्मस्मृतिभावावान् आसीत्। नित्यं भगवन्नामगुणश्रवण सङ्कीर्तन परः लौकिकसोदरैः कार्यविमुखः स्वसोदरैः अपि उन्मादी इव बधिरः इति अदृश्यत।

कदाचित् चोरनायकः सन्तानार्थं इमं भद्रकालीदेव्यै बलिमिव समर्पयितुंमेने। चोरनायकसेवकः बल्यर्थं स्वानीत व्यक्तेः पलायनात् इममेव रज्जुभिः बद्ध्वा शिरः खण्डनाय उद्युक्तः। तदा निश्चलमनस्कः ब्रह्मनिष्ठायामासीत्। हठात् भद्रकाली प्रत्यक्षीभूय चोरनायकस्य तच्छिष्यानां च शिरांसि चिच्छेद। भरतः किमप्यज्ञात इव स्वदैवकार्याणि यथाविध्याचरन् कालं यापयति स्म।


एकदा राजशिबिकावाहनार्थं वाहकचतुष्टये आवश्यके एकः न लब्धः। तदा राजसैनिकाः एनं नीत्वा शिबिकावाहकेष्वन्यतमं चक्रुः। जडभरतः शिबिकाभारं समं न वहति स्म। राजा क्रोधात् जडभरते परुषक्रूरदण्डन वचनानि प्रयुयोज। अकस्मात् मौनी भरतः नाहं भारवाहकः। देह एव। अहमात्मा इति गम्भीरात्मज्ञानसूचकवाक्या न्यब्रवीत्। एवं हरिणममकारात् जन्मत्रयं प्राप्य प्रारब्धक्षयान्मुक्तिमवाप। अतस्साधकेन श्रृङ्खलासदृश ममकारबन्धदूरेण भवितव्यम्।

कवयः किं न पश्यन्ति किं न कुर्वन्ति योषितः।

तेलुगु मूलम् - डा.श्रीनिवासदीक्षितुलु
चित्राणि - श्री के. द्वारकानाथः


# तिरुमङ्गै आल्वारु-भगवदुपदेशप्राप्तिः

संस्कृतानुवादः - डा.सूर्यनारायणरेड्डि
चरवाणी - ८१०६५७८२५०






सुखार्थीचेत् त्यजेत् विद्यां विद्यार्थी चेत् त्यजेत् सुखम्।



कुमुदवल्ली तिव्रमनोविचारे वर्तते। 12
अस्माकं विवाह विषयान् स्मर। 13
कुमुदे! नाहं विस्मरामि 14
तिरुमङ्गै यद्यपि राजा पर्याप्तधनाभावात् क्लिष्टदशायां वर्तते। कालियदनुचरैः चर्चितवान्। अन्ते चौर्य, पान्थनं आचरितुमचिन्तयत्। समीपस्थाटव्यांमार्गे चौर्याय निरीक्षतेस्म। विवाहबृन्दः आगतः। तिरुमङ्गै.... 15
सर्वेषामाभरणानि चोरितानि। परन्तु अस्य वरस्य अङ्गलीयकं आभरणं न बहिरागच्छति। 16
मया उच्यमानं मन्त्रं पठ।अङ्गुलीयकं अभरणं बहिरागमिष्यति। 17
वरस्य वचनानि श्रुत्वा वरः विष्णुमन्त्रमपठत् वरः विष्णुः। 18
अष्टाक्षरीमन्त्रोच्चरणात् वरः श्रीरङ्गनाथत्वेन दर्शनं ददौ। तिरुमङ्गै 19
ओं नमो नारायणाय 20
ओं नमो नारायणाय 21
रङ्गनाथ! मां क्षमस्व कारुण्यं प्रदर्शय 22
तिरुमङ्गै! सत्कार्यार्थं त्वं चोरः अभूः त्वं आल्वारुः मम परमभक्तः। 23
द्वादशाल्वारुषु अन्त्यः सञ्जातः तिरुमङ्गै आल्वारुः। 24
लोकास्समस्ताः सुखिनो भवन्तु।

# द्वादशराशीनां डिसेम्बर् मासफलानि 2025

- आचार्य वेदान्तं श्रीविष्णुभट्टाचार्यः, चरवाणी - ९८४९२६४६०७



१.मेषराशिः - आध्यात्मिकचिन्तनम्, दूरसञ्चारः, उद्योगपरिवर्तनम् शरीरपिडा, शतृजयः आध्यात्मिककार्यक्रमेषु निरतिः मासान्ते आर्थिकलाभः भविष्यन्ति। लक्ष्मीपूजनं कर्तव्यम्।

२.वृषभराशिः - सर्वत्रजयः, उद्योगपरिवर्तनं, शान्तस्वभावः अविवाहितस्य पत्नीलाभः, मासान्ते मनसिक चिन्ता, आत्मदुःखम्, तीर्थयात्राभिलाषः, सन्तानलाभः भविष्यन्ति शिवाराधनं करणीयम्।

३. मिथुनराशिः - देशसञ्चारः, वाक्पारुष्यं, आध्यात्मिकग्रन्थपरिशोधनासक्तिः जपतपादिकर्मसु आसक्तिः, मनसि वैराग्यभावना, स्त्रीजनद्वारा दुःखम्, आत्मोन्नतिः, आर्थिकलाभः, उद्योगजपः भविष्यन्ति। लक्ष्म्याराधनं करणीयम्।

४.कर्काटकराशि : - सहायः वाक्लाभः शरीरपीडा, धनलाभः सन्तानोन्नतिः शतृजयः, सोदरलाभः अधिकारजनद्वारा प्रशंसादयः तीर्थयात्राभिलाषः पठनपाठनकार्येषु उत्साहः भविष्यन्ति। शिवाराधनं करणीयम्।

५. सिंहराशिः - सर्वत्रजपः आध्यात्मिकजनपरिचयद्वारा आत्मतृप्तिः दैविककार्येषु निरतिः, वाहनलाभः, गृहलाभः, कुटुम्बे पत्नीचिन्तनम् अनारोग्यचिकित्सार्थं अधिकधनव्ययः, आलयदर्शनम्, ज्ञानवृद्धिः भविष्यन्ति। श्रीमहाविष्णोः आराधनं करणीयम्।

६. कन्याराशिः - आरोग्यचिन्ता, आभरणप्राप्तिः, सङ्कल्पितकार्याणां विघ्नाः, भाग्यलाभः सौभाग्यसिद्धिः, सुखं, तदा तदा आत्मदुःखम्, शत्रुबाधा, ज्वरपीडा, शस्त्राग्निद्वारा भीतिः, सम्भविष्यन्ति। विष्णोः समाराधनं कर्तव्यम्।

७. तुलाराशिः - अर्थसिद्धिः, वाक्लाभः कुटुम्बाभिवृद्धिः, मानसिकचिन्ता, दुःस्वप्नानि-भीतिः, आर्थिकलाभः, भगवदनुग्रहप्राप्तिः, उन्नतकार्यसिद्धि, सर्वत्रजयः सम्भविष्यन्ति। शिवाराधनं कर्तव्यम्।

८. वृश्चिकराशिः - अधिकधनव्ययः, आलयदर्शनम्, तीर्थयात्राभिलाषः, मानसिकचिन्तनम्, मानहानिः, सन्ताननष्टम्, वाक्पारुष्यं, ज्वरबाधा-भीतिः, भाग्यहानिः, आरोग्यलाभः, कार्यबन्धनम्, सम्भविष्यन्ति। नवग्रहाराधनं करणीयम्।

९. धनूराशिः - मनोदुःखम् आरोग्याभिवृद्धिः शत्रुवृद्धि, धनहानिः, स्थानभ्रंशः, खेदः, सौभाग्यं, उद्योगकार्येषु तदा तदा दुःखम्, ज्वरपीडा कलत्रदुःखं सम्भविष्यन्ति। नवग्रहाराधनं कर्तव्यम्।

१०. मकरराशिः - वाक्पारुष्यम्, धनलाभः, कीर्तिः, जयः, बहुवर्षेभ्यः अपरिष्कृतकार्यपरिष्कारः भविष्यति अधिकधनव्ययः, शोषणभावः, स्त्रीलाभः, आनन्दः, व्यायः, क्रूरत्वं, उद्योगजयः मित्रलाभः, सम्भविष्यन्ति गुरुग्रहाराधनं आचरणीयम्।

११. कुम्भराशिः - व्ययः, दूरसञ्चारः, धनहानिः, आकस्मिकधनलाभः, रिपुषुजयः, व्ययः, चिन्ता, कुटुम्बव्यवहारेषु मनोव्यथा, वृथाविवादाः शरीरस्य अस्वास्थ्यं सम्भविष्यन्ति। शिवाराधनं कर्तव्यम्।

१२. मीनराशिः - शरीरस्य अस्वास्थ्य चिन्तनम्, अधिकधनव्ययः, मनोल्लासः क्रोधः शत्रुभयम्, बन्धुजनसमागमः, मासान्ते धनलाभः, आत्मभीतिः, कीर्तिः, सम्भविष्यन्ति। नवग्रहाराधनं करणीयम्।



यतु संवत्सरं मौनेन भुञ्जति सः स्वर्गलोके महीयते।

Printed by Sri R.V.Vijaya Kumar, B.A.B.Ed. and Published by Dr.V.G. Chokkalingam, M.A., Ph.D.,on behalf of Tirumala Tirupati Devasthanams and Printed and Publised at Tirumala Tirupati Devasthanams Press, K.T. Road,Tirupati 517 507.
Editor : Dr.V.G. Chokkalingam, M.A., Ph.D.









**तिरुमल श्रीवेङ्कटेश्वरालये**
**19.12.2025 तिथ्यारभ्य**
**12.01.2026 पर्यन्तं**
**अध्ययनोत्सवाः**
**प्रवर्तिष्यन्ते।**

SAPTHAGIRI (SANSKRIT) SPIRITUAL ILLUSTRATED MONTHLY PUBLISHED BY
TIRUMALA TIRUPATI DEVASTHANAMS PRINTING ON 25-11-2025 & posting at Tirupati
RMS Regd.with the Registrar of Newspapers for India under RNI No.21138/1970 Postal
Regd. No. TRP/154/2024-2026" LICENCED TO POST WITHOUT PREPAYMENT
No.PMGK/RNP/WPP-04(4)/2024-2026" Posting on 1st of every month.

